# Shri Kataksha Shodashi

# શ્રીકટાક્ષષોડશી

## Document Information

Text title : Shri Katakshashodashi 06 03

File name : kaTAkShaShoDashI.itx

Category : vishhnu, ShoDasha, krishna

Location : doc_vishhnu

Author : Kavichandra

Proofread by : Saritha Sangameswaran

Description/comments : prakIrNastotrANi Stotrarnavah Ed. T.Chandrasekharan 1961 From stotrArNavaH 06-03

Latest update : March 27, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# Shri Kataksha Shodashi

# શ્રીકટાક્ષષોડશી

સમ્ભાવયન્ વિધિશિવૌ સકૃદિન્દિરાયાઃ
વક્ત્રારવિન્દપરિરમ્ભકરઃ સુરસ્પૃક્ ।
મજ્જન્ મુહુઃ સ્વશરણેષુ નિપત્ય મગ્નો
દીનેષુ રક્ષતુ સ ભાં ભગવત્કટાક્ષઃ ॥ ૧॥

મજ્જન્ દયામયસુધામ્બુનિધૌ જગત્યા-
મત્યાદરેણ પરિરભ્ય કરીન્દ્રમાર્તમ્ ।
કુમ્ભીરમાપ પરુષાકૃતિમેવ રોષાત્
યઃ પાતુ જાતુ વિશદો ભગવત્કટાક્ષઃ ॥ ૨॥

રક્તઃ સ્વયં સલિલરાશિસુતાસ્યબિમ્બ-
સમ્ભાવનાસુ શુચિરાર્તજનપ્રસાદે ।
અમ્ભોજનિઃસરદલિપ્રકારનુકારી
ચિત્રાસ્ચિરાદવતુ માં ભગવત્કટાક્ષઃ ॥ ૩॥

દુઃખપ્રવાહપરિણાહવિગાહનોદ્યત્-
સન્તાપમાદૃશવિવર્જનદુર્યશોભિઃ ।
સંલિપ્તમૂર્તિરિવ મેચકરોચિરવ્યા-
દવ્યાજરક્ષિતજગદ્ભગવત્કટાક્ષઃ ॥ ૪॥

પદ્માલાયાવદનમણ્ડલનેત્રયુગ્મ-
ચ્છદ્મોલ્લસદ્વિકચપદ્મવિહારલુબ્ધઃ ।
મુગ્ધો મધુવ્રતસમૂહ ઇવ પ્રસર્પન્
શ્રેયઃ સમર્પયતુ મે ભગવત્કટાક્ષઃ ॥ ૫॥

પાતાનુભાવપરિપાવિતપાતકાધ્વ-
પાન્થાધિકારરહિતાન્તકદર્શિન્તાધિઃ ।
દુઃખાભિભૂતતરભૂતચયાનુભૂતૌ
દાયસ્તનોતુ કુશલં ભગવત્કટાક્ષઃ ॥ ૬॥

મન્દારમુખ્યસુરવૃક્ષવદાન્યભાવઃ
    સન્ધ્યાસ્ફુટીકૃતબહુપ્રવણાર્થિવન્ધ્યઃ ।
નિષ્કામભક્તજનસાત્કૃતનિત્યધામા
    કામાય સમ્ભવતુ મે ભગવત્કટાક્ષઃ ॥ ૭॥

ન્યસ્તાત્મભારભરણાદરભાવ્યમાન-
    વૃત્તિપ્રવૃત્તિપરતન્ત્ર ઇવ પ્રવૃત્તિઃ ।
સદ્વૃત્તિધૂર્તવિષયાધિકતોપરોષ-
    સંલક્ષિતો ભગવતોઽવતુ માં કટાક્ષઃ ॥ ૮॥

દુર્વારમારશરવાર ઇવાતિધીર-
    વારાઙ્ગનાહૃદયદુર્જયધૈર્યભેદી ।
સત્પક્ષયોગવિહિતદ્રુતગત્યનિન્દ્યો
    નિન્દ્યાં મતિં હરતુ મે સ હરેઃ કટાક્ષઃ ॥ ૯॥

નિર્વ્યાજદૃષ્ટિકરુણામૃતવૃષ્ટિહૃષ્ટ-
    પુષ્ટત્રિલોકગતકોકવિલોકનીયઃ ।
દિવ્યામ્બુવાહ ઇવ સક્ષણરુગ્વિલાસઃ
    તાપત્રયં હરતુ મે સ હરેઃ કટાક્ષઃ ॥ ૧૦॥

યસ્મિન્ સમુલ્લસતિ કામધુગલ્પદો વા
    કલ્પદ્રુરલ્પફલપુષ્પ ઇવાસ્તુ કલ્પઃ ।
ચિન્તામણિર્મણિગણૈર્ગણનીયભાગ્યઃ
    કામં સ પૂરયતુ મે ભગવત્કટાક્ષઃ ॥ ૧૧॥

અન્તર્નિરન્તરવલદ્વિમલાનુકમ્પા-
    સંસ્પર્ધમાનમહિમાનુગૃહીતભક્તઃ ।
અગ્રાધ્વજાગ્રદતિવેલલસત્તિતિક્ષઃ
    ક્ષેમં તનોતુ નિતરાં ભગવત્કટાક્ષઃ ॥ ૧૨॥

ઇન્દીવરોદરમનોહરમન્દિરાન્ત-
    ર્વાસ્તવ્યકાન્તિરમણીપરિરભ્યમાણઃ ।
કશ્ચિદ્વિપશ્ચિદનુભૂતમહાપ્રસાદઃ
    સીદન્તમુદ્ધરતુ માં ભગવત્કટાક્ષઃ ॥ ૧૩॥

ધ્યાયાન્નિકાયનિરપાયકૃપૌધયુક્તો

મુક્તોપભુક્તમહિમામૃતસિન્ધુબિન્દુઃ ।
કામપ્રકામફલદાનનિદાનકલ્પ-
વૃક્ષોપમઃ ફલતુ મે ભગવત્કટાક્ષઃ ॥ ૧૪॥

યસ્યાનુકૂલ્યબહુમૂલ્યમનોજ્ઞરત્ન-
ભૂષાવિભૂષિતતનુસ્તનુજામ્બુરાશેઃ ।
ભૂરપ્યભૂદતુલસૌભગયોગયોગ્યા
ભૂયાત્ સ ભૂરિવિભવાય વિભોઃ કટાક્ષઃ ॥ ૧૫॥

ઇન્દીવરૈરિવ કિરન્ રુચિભિઃ સમન્તાત્
વૃન્દાવનાન્તરમનન્તગુણાસ્પદં યઃ ।
આનન્દયત્યનુદિનં વ્રજસુન્દરીણાં
ચેતાંસિ મેઽસ્તુ સુખદઃ સ હરેઃ કટાક્ષઃ ॥ ૧૬॥

કટાક્ષષોડશી સે કવિચન્દ્રવિનિર્મિતા ।
કલેવ કૃષ્ણચન્દ્રસ્ય કરોતુ જગતાં મુદમ્ ॥ ૧૭॥

ઇતિ શ્રીકટાક્ષષોડશી સમ્પૂર્ણા ।
ભગવત્કટાક્ષષોડશી

Proofread by Saritha Sangameswaran

*Shri Kataksha Shodashi*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*